# ।। लौकिकन्यायसंग्रहः ।।

श्री-साधुवृन्दवन्दितपादारविन्दवैराग्यादिरत्नाकरविद्वद्वर-
श्रीमद्रामदयालुशिष्येण सोमवंशीयविन्दरायकुलोत्तंसभगवत्-
परायणश्रीसेवादेव्याश्रितपादारविन्द-श्रीगुलावरायवर्मात्मजेनोदा-
सीनावस्थेन रघुनाथवर्मणा विरचितः ।

सम्पादक
**डः तपनशङ्करभट्टाचार्य्यः**, एम.ए., पि.-एइच्.डि., डि.लिट्,
काव्य-व्याकरण (पाणिनि)-तर्कतीर्थ, नव्य-व्याकरणाचार्य्यः,
संस्कृतविभागीयप्रधानः, यादवपुरविश्वविद्यालयस्य ।

SBD
संस्कृत वुक डिपो
२८/१, विधान सरणी
कलकाता-७०० ००६

श्रीगणेशाय नमः ।

# लौकिकन्यायसङ्ग्रहः ।

यत्कीर्तिप्रभया सुशुक्लभुवने मायाप्रभावैः प्रभो-
र्लीलादेर्जनिता ऽप्रतीतिरचला द्यौः संभृता शोभते ।
यच्छिष्योडुगणैः स मे गुरुरहो हार्दान्धकारापहः
श्रीमद्रामदयालुरिन्दुरमलो मोदाय भूयात्सदा ॥ १ ॥
नत्वा शंभुं हरिं गौरीं विधिं बुद्धिं च भारतीम् ।
क्रियते रघुनाथेन लौकिकन्यायसंग्रहः ॥ २ ॥
लौकिकन्यायरत्नानामाकरे यत्प्रदर्शितम् ।
तस्य संक्षेप एवेह शीघ्रबोधाय दर्श्यते ॥ ३ ॥
न्यायार्थं विषयं चैवोदाहृतिं च यथामति ।
वदिष्यामो ऽत्र संक्षेपाद्विस्तरादपि च क्वचित् ॥ ४ ॥
प्रसङ्गादागतानां तु न्यायानां तत्र विस्तृतेः ।
अर्थमात्रं वदिष्यामः क्वचिदन्यामुदाहृतिम् ॥ ५ ॥
प्रसङ्गादायाता अपि निगदविख्यातविषया
न ते व्याख्यास्यन्ते पुनरसकृदुक्ताश्च विरलाः ।
पुनर्व्याख्यास्यन्ते विषयकथनादिप्रवितताः
पुरो ऽप्रोक्तान्कांश्चित्पुनरपि वदिष्यामि विषये ॥ ६ ॥
अर्थादर्थो न शब्दार्थ इत्याद्या वृद्धसूक्तयः ।
पूर्वैर्न्यायतया प्रोक्ता वदिष्यामस्ततस्तथा ॥ ७ ॥
उदाहृतिं वदिष्यामः प्रायो वेदान्तशास्त्रगाम् ।
मीमांसान्यायवर्गां कां चित्कां चिच्चापरशास्त्रगाम् ॥ ८ ॥
आम्नायशिरसामस्या निबन्धत्वं न तावता ।
स्याद्विशेष्यात्तु तद्वाद इति न्यायसमाश्रयात् ॥ ९ ॥

पञ्चीकृतस्य भूम्यादेः पृथिवीत्वादिकं यथा ।
आम्नायात्तनिबन्धत्वं तथा ऽस्य स्यादसंशयम् ॥ १० ॥
असाधारणधर्मस्य गन्धवत्त्वादिकस्य वै ।
उपलम्भात्तथात्वं चेत्तन्नैवात्रापि वारितम् ॥ ११ ॥
शास्त्रैकदेशसंबन्धं शास्त्रकार्यान्तरे स्थितम् ।
इति लक्षणसंबन्धो विद्यते ऽत्र यतो ध्रुवम् ॥ १२ ॥
उपासनाः क्रियारूपाः अत्यन्तेषु तथा ऽऽकरे ।
दृश्यन्ते हि तथा ऽप्येषां वेदान्तत्वं यथा ध्रुवम् ॥ १३ ॥
यथा चान्यनिबन्धेषु बहुष्वप्यन्यगोचरः ।
विचारो दृश्यते तद्वद्भवत्व ऽत्रापि न क्षतिः ॥ १४ ॥
ससैन्धवे ऽपि मौद्गे हि सूपे मौद्गत्ववद् ध्रुवम् ।
अत्यन्तस्य निबन्धत्वं निबन्धस्यास्य गम्यताम् ॥ १५ ॥
तत्तदीयैरनूबन्धैरिदं स्यादनुबन्धवत् ।
तदीयाः के ऽनुबन्धाः स्युरिति चेत्त्वमवेहि तान् ॥ १६ ॥
स्यादत्रोपनिषन्नाम छन्दसां काण्ड उत्तरः ।
वेदान्तस्तदनुग्राहि सूत्रभाष्यादिकं तथा ॥ १७ ॥
अधिकारी सविषयः सम्बन्धः सप्रयोजनः ।
अनुबन्धा इति ख्याताश्चत्वारः सन्ति शास्त्रगाः ॥ १८ ॥
अधीतवेदवेदाङ्गो ह्यापातब्रह्मबोधवान् ।
बहुजन्मार्जितैः पुण्यैः सम्यगाराधितेश्वरः ॥ १९ ॥
ब्रह्म नित्यमनित्यं तु जगदेवं विवेचकः ।
ऐहिकामुष्मिकेभ्यश्च भोगेभ्यो विरतः सदा ॥ २० ॥
यत्नेन मनसा नित्यं विषयेभ्यो निवर्त्तकः ।
तेभ्यो बाह्येन्द्रियाणां च बलादाकर्षकः सदा ॥ २१ ॥
उभयेषां निवृत्तानां तथा स्थापनयत्नवान् ।
शीतोष्णसुखदुःखानां तथा मानापमानयोः ॥ २२ ॥